**स्स त्वा मन्मंनसं कृणोतु । [7]एकंमिषे विष्णुस्त्वा-ऽन्वेंतु [8]द्वे ऊर्जे [9]त्रीणिं व्रतायं [10]चत्वारि मायोभ-वाय [11]पञ्च पशुभ्य[12]ष्षडृतुभ्य[13]स्सप्त सप्तभ्यो हो-त्राभ्यो विष्णुस्त्वाऽन्वेंतु । [14]सखा सप्तपंदा भव**

भूतो वायुः सः त्वा त्वां **मन्मनसं** मयि मनो यस्यास्सा मन्मनाः तादृशीं कृणोतु करोतु ॥

[7—13]अथैनां सप्तपदान्यभिप्रक्रमयति—**एकमिष** इति ॥ इट् अन्नं, **एकं** पदं **विष्णुः त्वाऽन्वेतु इषे** तवान्नं यथा स्यादिति । ऊर्क् बलम् । व्रतं कर्म । मयः सुखं तद्भावाय भवतीति मयोभूः तस्या भावो मायोभवं तस्मै, 'मायो भव्याय'* इत्या-श्वलायनः । पञ्च पशुभ्यः । षडृतुभ्यः । सप्त सप्तभ्यः । सर्वत्र विष्णुस्त्वाऽन्वेत्वित्यनुषङ्गः । होता प्रशास्ता ब्राह्मणाच्छं-सी पोता नेष्टाऽच्छावाक आग्नीध्र इत्येतास्सप्त होत्राः । तथा च ब्राह्मणं 'तस्मात्सौम्यस्याध्वरस्य यज्ञक्रतोः । सप्तहोत्राः प्राची-वषट्कुर्वन्ति'† इति । ताभ्यः ताः यज्ञकर्मणि तव यथा स्यु-रित्येवमर्थं विस्णुस्त्वाऽन्वेतु ॥

[14]सप्त पदानि यया क्रान्तानि सा **सप्तपदा** एवंभूता त्वं **सखा भव** । **सप्तपदा** सप्तपदौ । द्विवचनस्याकारः । सप्तपदौ त्वं च अहं च **सखायौ बभूव** बभूविव । छान्दसो विशब्दस्यलोपः । आद-

*गृ. १-७-१९. †ब्रा. ३-३-६.

**सखायौ सप्तपदा बभूव सख्यं ते गमेयꣳ सख्यात्ते मा योषꣳ सख्यान्मे मा योष्ठास्समयाव संकल्पावहै संप्रियौ रोचिष्णू सुमनस्यमानौ । इषमूर्जमभि संवसानौ सं नौ मनाꣳसि सं व्रता समु चित्तान्याकरम् । सा त्वमस्यमूहममूहमस्मि सा त्वं**

रार्थं पुनर्वचनम् । **सख्यं ते गमेयं** गम्यासं **सख्यात्ते मा योषं** वियुक्तः पृथक्कृतो मा भूवं, त्वं च **सख्यान्मे मा योष्ठाः** । **समयाव** । संपूर्वस्य इणो लोटि रूपम् । सङ्गतौ स्याव । **सङ्कल्पावहै** इदमिदं च कर्तव्यमिति । **सम्प्रियौ** परस्परं सम्प्रीयमाणौ **रोचिष्णू** सदृशसम्बन्धत्वात् परस्पराश्रयेण दीप्यमानौ **सुमनस्यमानौ** सुमनायमानौ । भृशादिरयं छान्दसस्सलोपाभावः । **इषमूर्जमभिसंवसानौ** सहानुभवन्तौ समयावेति सम्बन्धः । **नौ** आवयोः **मनांसि** व्यापारबहुत्वान्मनोबहुत्वं **समाकरं** सङ्गतानि करोमि । तथा **व्रता** व्रतानि कर्माणि समाकरं यस्त्वया धर्मश्चरितव्यः सोऽनया सहेति । तथा **समुचित्तानि** उ इत्यनर्थकः, मनस उक्तत्वाद्बाह्येन्द्रियाण्यत्र चित्तानि तान्यपि समाकरम् । सा त्वं सेति ऋचोऽभिधानम्, अम इति साम्नः । 'सैव नाम ऋगासीदमो नाम साम' * इति बह्वृचब्राह्मणदर्शनात् । त्वं **साऽसि** ऋगसि **अमोऽहम्** । संहिताकाले ओकारस्य ऊकारः । बह्वृचानां तु 'अमोऽहम्' इति पाठः । एतदेवादरार्थं पुनरुच्यते । **अमूहमस्मि** अमः अहमस्मि **सा त्वं**

*ऐ. ब्रा. ३-२-२३.